**प्रात : 06:55**

**दिनाङ्कः-10/10/2023**

## पञ्चराज्येषु विधानसभानिर्वाचनानां घोषणा

निर्वाचनायोगेन पञ्च-राज्येषु विधानसभा निर्वाचनानाम् घोषणा कृता मिजोरमे, छत्तीसगढे, मध्यप्रदेशे, राजस्थाने तेलंगानायां च विधानसभा निर्वाचनानि आगामि-मासस्य सप्तमी-त: त्रिंशीं यावत् कारयिष्यन्ते, अथ चैतेषु पञ्च-राज्येषु मतगणना दिसम्बर-तृतीयायां विधास्यते। भारतीय निर्वाचनायोगेन पञ्च-राज्येषु विधानसभा निर्वाचनानां कार्यक्रमस्य घोषणा विहितास्ति। मिजोरमे नवम्बर-सप्तम्यां एकस्मिन्नेव चरणे मतदानम् आयोक्ष्यते, एतदर्थम् अधिसूचना अस्य मासस्य त्रयोदश्यां तिथौ प्रख्यापयिष्यते। छत्तीसगढे प्रथम-चरणस्य मतदानं नवम्बर-सप्तम्यां, द्वितीय-चरणस्य च नवम्बर सप्तदश्यां भविष्यति। प्रथम चरणस्य कृते अधिसूचना अस्य मासस्य त्रयोदश्यां तिथौ, द्वितीय-चरणस्य च कृते एकविंश्यां तिथौ प्रख्यापयिष्यते। अपरत्र च मध्य-प्रदेशे नवम्बर-सप्तदश्यां, आयोक्ष्यमाणस्य मतदानस्य कृते अधिसूचना अक्टूबर-एकविंश्यां तिथौ प्रख्यापयिष्यते, तत्रैव राजस्थाने नवम्बर-त्रयोविंश्यां आयोक्ष्यमाणस्य मतदानस्य कृते अधिसूचना अक्टूबर त्रिंश्यां प्रख्यापयिष्यते। तेलंगानायां नवम्बर-त्रिंश्यां एकस्मिन्नेव चरणे मतदानं भविष्यति। राज्ये निर्वाचनस्य अधिसूचना नवम्बर-तृतीयायां प्रख्यापयिष्यते। नव-दिल्ल्यां मुख्य-निर्वाचनायुक्त: राजीव कुमार: प्रत्यपादयत् यत् एतेषु पञ्च-राज्येषु विधानसभा निर्वाचनानां विशेष-महत्त्वम् एतदर्थमप्यस्ति यतोहि एतद्धि आगामि-वर्षस्य साधारण निर्वाचनात् पूर्वम् आयोक्ष्य-माणं अन्तिम-विधानसभा-निर्वाचनं भविष्यति। अमुना आश्वासितं यत् निर्वाचनायोग: एतेषु पञ्च राज्येषु निष्पक्षं स्वतन्त्रं च निर्वाचनं सुनिश्चितं करिष्यति। अमुना भाणितं यत् निर्वाचनायोगेन स्वस्थ-त्रुटिमुक्त-समावेशि-मतदातृ-सूची निर्माणे विशेष-रूपेण बलं प्रदत्तम् अस्ति। एतेषु पञ्च राज्येषु आहत्य एकोनाशीत्युत्तर-षट्-शत-मितानि विधानसभा-आसनानि सन्ति। अथ च षोडश -सहस्र-कोटिका: मतदातार: वर्तन्ते। एतस्मिन् निर्वाचने प्राय: षष्टि लक्षाधिका: मतदातार: ऐदम् प्राथम्येन स्वीय-मताधिकारस्य प्रयोगं करिष्यन्ति।

## वैश्विव नेतार:/इजराईल

संयुक्त राज्यामेरिका, फ्रांस, जर्मनी, यूनाइटेड किंगडम्, इटली देशानां नेतार: अद्य संयुक्त वक्तव्यं प्रकाशितवन्त: यत् इजरायल-देशे हमास-उग्रवादीसमूहेन कृतानां आकस्मिक-आक्रमणानां निन्दां कृतवन्त:। अमेरिकीय- राष्ट्रपति: जो बाइडेन:, फ्रांस देशस्य राष्ट्रपति: इमैनुएल मैक्रॉन, जर्मनी देशस्य सचिव: स्कोल्ज:, इटली देशस्य प्रधानमन्त्री-जिआर्जिया मेलोनी, यूनाईटेड किंगडम् इत्यस्य प्रधानमन्त्री ऋषि सुनकेन च संयुक्त-वक्तव्ये उक्तं यत् हमासस्य कार्याणां कोऽपि औचित्यं नास्ति इति।

इजराइलस्य हमासातंकि-समूहस्य च मध्ये प्रवर्तमाने संघर्षे मृतकानां संख्या एकादश शतऽतोप्यधिका जाता अस्ति। प्राय: सप्त-शत-मिता: इजराइल-देशीया: जना: मृतिं गता: सन्ति चेत् चतुश्शतमिता: जना: गाजा-पट्टिकायां पञ्चतां प्रापिता: सन्ति । अस्मिन् संघर्षे पारेसहस्रं जना: व्रणिताः सन्ति इति आशंक्यन्ते। कतिपय-क्षेत्रेषु हमास-आतङ्किनाम् आक्रमणस्य अनन्तरं

ध्वंसावशेषस्य अपाकरणमपि नैव जातम् अस्ति चेत् क्वचित् क्वचित् युद्धं प्रचलदेव वर्तते। अनेन कारणेनापि मृतकानां संख्या अतोऽपि समेधितुं शक्नोति।

**प्रधानमन्त्री/क्रीडका:**

प्रधानमन्त्री नरेन्द्र मोदी: अद्य नवदिल्ल्यां भारतीय क्रीडकानां दलेन ये चीनस्य हांग्चोउ इत्यत्र एशियाई क्रीडासु भागं भजितवन्त: तै: सह वार्तालापं करिष्यन्ति तान् सम्बोधयन्ति च, कार्यक्रमे प्रधानमन्त्री: एशियायी क्रीडासु उत्कृष्टोपलब्धये क्रीडकान् वर्धापयिष्यन्ति तेभ्य: भविष्यस्य प्रतियोगिताभ्य: प्रेरयिष्यन्ति च। ध्येयं यत् हांग्चोउ इत्यत्रायोजिते एशियाई क्रीडासु भारतेन अष्टाविंशति: स्वर्ण पदकानि समेत्य सप्तोत्तर एकशतं पदकानि विजितम्। एश्यिाई क्रीडायां भारतस्य पदकसंख्यानुसारं सर्वोत्तम प्रदर्शनम् अस्ति।

**नोबेल पुरस्कार:**

विंशतिः त्रयोविंशतिः वर्षस्य अर्थशास्त्रस्य नोबेल पुरस्कारः हार्वर्ड विश्वविद्यालयस्य प्रोफेसर क्लाउडिया गोल्डिन इत्यस्यै प्रदास्यते। रॉयल स्वीडिश एकेडमी ऑफ साइंसेज इत्यनेन ह्यः एव अस्य घोषणा विहिता। आर्थिक विज्ञान क्षेत्रे नोबेल मेमोरियल पुरस्कारं स्वेरिजेस रिक्सबैंक पुरस्कारस्य रूपेण ज्ञायते। क्लाउडिया गोल्डिन इत्यस्यै पुरस्करोयं "महिलानां श्रमं आपणस्य परिणामणां विषये अस्माकं ज्ञानोन्नताय " प्रदास्यते।

संप्रत्यावत् आर्थिक विज्ञान क्षेत्रे असाधारण योगदानाय नोबेल पुरस्कारेण द्वे एव महिले एलिनोर ओस्ट्रोम, एस्थर डफ्लो सम्मानितौ स्तः। अनेन पुरस्कारेण सम्मानानन्तरं प्रोफेसर गोल्डिन तिस्रः महिला भविष्यति।

**क्रिकेट्**

हैदराबादे क्रिकेट विश्व चषक प्रतिस्पर्धायां न्यूज़ीलैंड दलेन नीदरलैंड दलं नवनवतिः धवनाङ्कैः पराजितम्।

**।। इति वार्ता: ।।**